गर्भन्यासं तु तत्रैव गर्भभाजनसंयुतम् ।
प्रागुक्त विधिना स्थाप्य गन्धपुष्पादिभिर्यजेत् ॥ ५६ ॥

स्थापयेत्पूर्ववच्छूलं मूलं वै गर्भभाजनम् ।
यत्र शेषं तु यत्कर्मशिल्पिभिस्तु विशेषतः ॥ ५७ ॥

कर्तव्यं लक्षणोपेतं स्थपतिः शिल्पिरुच्यते ।
स्थपतिश्चित्रकर्मज्ञो योज्यश्चान्यैर्न कारयेत् ॥ ५८ ॥

कृतं चेदन्यथा विप्र कर्ता चान्यो भविष्यति ।
आचार्यं पूजयेत्तत्र वस्त्रहेमांगुलीयकैः ॥ ५९ ॥

दक्षिणां दापयेत्तत्र पंचनिष्कहिरण्यकम् ।
शूलस्थापनमाख्यातं रज्जुबन्धमथ शृणु ॥ ६० ॥

इत्यंशुमान्काश्यपे शूलस्थापनविधिपटलः (चतुरशीतितमः) ॥ ८४ ॥

अथ वक्ष्ये विशेषेण रज्जुबन्धं शृणु द्विज ।
सर्वासु शूलसंध्यासु ताम्रपत्रैस्तु वेष्टयेत् ॥ १ ॥

शूलेऽष्टबन्धमालिप्य रज्जुबन्धं ततो विदुः।
श्रीवेष्टकं कुन्दुरुष्कं गुग्गुलं च गुलं तथा॥ २॥

सर्जरसं गैरिकं च घृततैलेऽष्टबन्धनम्।
श्रीवेष्टनं चतुर्भागं कुन्दुरुष्कं गुणांशकम्॥ ३॥

गुग्गुलं पंचभागं स्याद् एकांशं गुलमुच्यते।
सर्जरसं तु वस्वंशं गैरिकं तु गुणांशकम्॥ ४॥

षडेते सूक्ष्मचूर्णं तु कृत्वाज्यं तैलमिश्रितम्।
मृत्पात्रे तं विनिक्षिप्य पाचेत्क्षौद्राकृतिर्यदा॥ ५॥

तदा तु शूलमालिप्य रज्जुबन्धं ततः कुरु।
रज्जुबन्धं तु नाभेस्तु मध्यस्योदूर्ध्वगं त्रिधा॥ ६॥

सुषुम्ना मध्यमेऽप्याथ पिंगला तस्य दक्षिणा।
इडा वै तस्य वामस्था प्रधाना नाडयस्त्विमे॥ ७॥

द्व्यंगुलं परिणाहं तु युतास्ते वै त्रि कीर्तिताः।
तेषां नाडी त्रयाणां तु योगं भ्रूमध्यमे भवेत्॥ ८॥

तदधो विवृता स्विष्टव्यंश दण्डे पुराश्रिताः ।
भ्रूमध्यान्मूर्ध्निपर्यन्तं त्रिनाडी चैकवद्भवेत् ॥ ९ ॥

तन्मूर्धोपरिनाडिस्तु सप्तशाखानु भेदिनः ।
गान्धारी हस्ति जिह्वा च पूषा चैव यशस्विनी ॥ १० ॥

p. 366) अलंबुषा कुहूचैव शंखिनी तेऽभिधानकाः ।
गान्धारी सव्यनेत्रान्तं हस्तिजिह्वेतराक्षिकाः ॥ ११ ॥

पुषाद्दक्षिणकर्णान्तं वामकर्णे यशस्विनी ।
अलम्बुषा मेढ्रमूलान्ता वक्रदन्ता कुहूर्भवेत् ॥ १२ ॥

नाभिमध्यावसानं तु शंखिनीलम्बनं भवेत् ।
तेष्वादौ च चतुर्नाडी यवत्रयघनान्विता ॥ १३ ॥

शेषानाडी त्रयाणां तु चतुर्यवघनं भवेत् ।
दक्षिणावर्तिताः सर्वे द्विवत्यैने प्रकीर्तिताः ॥ १४ ॥

सुषुम्नादीनि संख्यान्तं दशनाडीति विद्यते ।

प्रधाननाडी त्रयाणां तु मूलमेढ्रावसानकम् ॥ १५ ॥

तेषां नाडिभिन्नास्तु नाडयोऽष्टादश स्मृताः।
विमला शोषिणी पृथ्वी महसी तेजसी तथा ॥ १६ ॥

वायवी गगनी चैव मर्दनी रोदनी तथा।
रसवादी मृदंगी च संगिनी * * * * * ॥ १७ ॥

* * दौरसनाड्यस्तु सव्यपादाग्रमूलकम्।
ऊरुमूलैवमावृत्य परितो नलकान्तकम् ॥ १८ ॥

लम्बितास्ते समाख्यातास्ता वै पिंगलगा * *।
शब्दांगादीनि षट्संख्या इडामूले समुद्भवाः ॥ १९ ॥

एषा वै रसनाडी च वामपादौ तु सव्यवत्।
नलकाग्रैकमावृत्य षण्मा * ग्रेक वर्तिताः ॥ २० ॥

p. 367) सुषुम्नामूलगाः शेषा वंशपार्श्वे गरोहिताः।
वक्षोदण्डोपरिष्टात्तु तिर्यग्बाहुगास्त्विमाः ॥ २१ ॥

गगनी मर्दनी चैव रोदनी दक्षिणे करे।
रसवादी मृदंगी च संगिनी वामबाहुके॥ २२॥

बाहुमूलैकमावृत्य त्रिष्वग्रं चैकवद्भवेत्।
तदस्याग्रादष्टशाखा स्युः दक्षिणेऽदक्षिणे तथा॥ २३॥

बाहुमूलाग्रचान्तं तु नाड्योऽष्टौ प्रसारिताः।
तेषामग्रैकवद्विप्र मणिबन्धैकमावृतम्॥ २४॥

एकं वाऽनेकहस्तं वा हस्तं प्रत्येकमाचरेत्।
एवं हि प्रतिमानां तु मुख्यनाड्यष्टविंशतिः॥ २५॥

प्रधाननाड्यस्त्वेवं कल्पयेत्कल्पवित्तमः।
तेषां भिन्नास्तथा विप्र चतुष्षष्टिश्च नाडयः॥ २६॥

तस्मादनेकधा नाडी सर्वांगं तु समावृताः।
द्विसप्तति सहस्राणि नाड्यः परिकीर्तिताः॥ २७॥

स्वावृतं शूलजीर्णकाश्वत्थ पत्रवत्।
नालिकेरफलत्वग्म्यन्नत्यल्प सलिलान्वितम्॥ २८॥

चर्मसारं गृहीत्वा तु सारमन्यं व्यपोह्य च ।
नाडयस्तेऽपि संकल्प्य पश्चादावृतनाडिकाः ॥ २९ ॥

षड्यवं तु परीणाहं रज्जुमापादयेद्दृढम् ।
पश्चान्निरन्ध्रं रज्जुभ्यां बन्धयेद्दक्षिणा वृतम् ॥ ३० ॥

p. 368) हृत्पद्ममष्टपत्रं तु रज्जुना कारयेद्बुधः ।
तस्यनालं तु नाभ्यन्तं सुषुम्ना सहबन्धितम् ॥ ३१ ॥

जीवस्थानं तु तत्पद्मं इत्युक्तं हि मया तव ।
मूलमंत्रमनुस्मृत्य रज्जुबन्धमिदं कुरु ॥ ३२ ॥

रज्जुबन्धमिदं ख्यातं मृत्संस्कारमतः परम् ।

इत्यंशुमान्काश्यपे रज्जुबन्धविधानपटलः (पंचाशीतितमः) ॥ ८५ ॥

मृत्संस्कारमहं वक्ष्ये संक्षेपाच्छृणु सुव्रत ।
जांगलं चानुरूपं च समंशं मृत्त्रिधा भवेत् ॥ १ ॥

अथ श्री–क्रमः

प्रथमम् आह्निकप्रकरणम्

(ब्राह्ममुहूर्तकृत्यं मन्त्रमहार्णवश्रीविद्यार्णवनित्योत्सवादिषु प्रतिपादितम्)

(ब्राह्मे मुहूर्ते चोत्थाय निद्रास्थानाद् बहिर्निर्गत्य पादौ मुखं च प्रक्षाल्याचम्य रात्रिवस्त्रं परित्यज्य शुद्धवस्त्रं परिधाय शुद्धासने उपविश्य शिरसि सहस्रारे श्वेतवर्णं स्वगुरुं ध्यायेत्)

आनन्दमानन्दकरं प्रसन्नं ज्ञानस्वरूपं निजबोधरूपम्।
योगीन्द्रमीड्यं भवरोगवैद्यं श्रीमद्गुरुं नित्यमहं भजामि।।

श्रीगुरुपादुकापञ्चकम्

ब्रह्मरन्ध्रसरसीरुहोदरे नित्यलग्नमवदातमद्भुतम् ।
कुण्डलीविवरकाण्डमण्डितं द्वादशार्णसरसीरुहं भजे।।१।।
तस्य कन्दलितकर्णिकापुटे क्लृप्तरेखमकथादिरेखया।
कोणलक्षितहळक्षमण्डलीं भावलक्ष्यमबलालयं भजे।।२।।
तत्पुटे पटुतडित्कडारिमस्पर्द्धमानमणिपाटलप्रभम् ।
चिन्तयामि हृदि चिन्मयं वपुर्नादबिन्दुमणिपीठमुज्ज्वलम्।।३।।
ऊर्ध्वमस्य हुतभुक्शिखात्रयं तद्विलासपरिबृंहणास्पदम्।
विश्वघस्मरमहोच्चिदोत्कटं व्यामृशामि युगमादिहंसयोः।।४।।
तत्र नाथचरणारविन्दयोः कुङ्कुमासवपरीमरन्दयोः ।
द्वन्द्वबिन्दुमकरन्दशीतलं मानसं स्मरति मङ्गलास्पदम्।।५।।
निषक्तमणिपादुका–नियमितौघकोलाहलं,
स्फुरत्किसलयारुणं नखसमुल्लसच्चन्द्रकम्।
परामृतसरोवरोदितसरोजसद्रोचिषं,
भजामि शिरसि स्थितं गुरुपदारविन्दद्वयम्।।६।।
अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः।।७।।

श्रीगुरुपञ्चकम्

नमस्ते नाथ भगवन् शिवाय गुरुरूपिणे।
विद्यावतारसंसिद्ध्यै स्वीकृतानेकविग्रह।।१।।

नवाय नवरूपाय परमार्थस्वरूपिणे।
सर्वाज्ञानतमो-भेद-भानवे चिद्घनाय ते।।२।।
स्वतन्त्राय दयाक्लृप्त-विग्रहाय शिवात्मने।
परतन्त्राय भक्तानां भव्यानां भव्यरूपिणे।।३।।
विवेकिनां विवेकाय विमर्शाय विमर्शिनाम्।
प्रकाशानां प्रकाशाय ज्ञानिनां ज्ञानरूपिणे।।४।।
पुरस्तात् पार्श्वयोः पृष्ठे नमस्कुर्यामुपर्यधः।
सदा मच्चित्तरूपेण विधेहि भवदासनम्।।५।।
इत्येवं पञ्चभिः श्लोकैः स्तुवीत यतमानसः।
प्रातः प्रबोध-समये जपात् सुदिवसं भवेत्।।६।।

ऐं ह्रीं श्रीं हस्ख्फ्रें हसक्षमलवरयूं सहक्षमलवरयीं ह्सौः स्हौः
स्वरूपनिरूपणहेत्वमुकाम्बासहितगुरुश्रीपादुकां पूजयामि नमः।
स्वच्छप्रकाशविमर्शहेत्वमुकाम्बासहितपरमगुरुश्रीपादुकां पूजयामि नमः।
स्वात्मारामपञ्जरविलीनतेजस्कामुकाम्बासहितपरमेष्ठिगुरुश्रीपादुकां पूजयामि नमः।
(इति गुरु-परमगुरु-परमेष्ठिगुरु-पादुकापूजनं भावयेत्।)

श्रीगुरुप्रणतिः

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः।
गुरुः साक्षात्परं ब्रह्म तस्मै श्रीगुरवे नमः।।
वन्दे गुरु-पद-द्वन्द्वमवाङ्मनसगोचरम्।
रक्त-शुक्ल-प्रभा-मिश्रमतर्क्यं त्रैपुरं महः।।

(इति प्रणम्य प्राणानायम्य च तच्चरणयुगलविगलदमृतरसविसरपरिपुताखिलाङ्गमात्मानं भावयेत्)।

इष्ट-मन्त्र-भावनम्

ततश्च सर्वचैतन्यात्मिकां जाग्रदाद्यवस्थात्रयावभासिकां सर्वाधिष्ठानरूपां प्रत्यक्चैतन्याभिन्नब्रह्मात्मिकां सर्वचैतन्यविवर्जितामखण्डां चितिं भावयेत्। यथा-

आमूलाधारादाब्रह्मबिलं विलसन्तीं तडिल्लतासदृशाकृतिं तरुणारुण-पिञ्जरां तैजसीं ज्वलन्तीं कुण्डलीरूपां सर्वाधिष्ठानभूतां परां संविदं चिन्तयेत्। मूलमन्त्रं च दशवारमावर्तयेत्।

कुण्डलिनी–मन्त्रजप–विधिः

नियमितपवनस्पन्दो मूलाधारे चतुर्दलपद्मे त्रिकोणात्मकं पीठस्थित–ज्योतिलिङ्गमावेष्ट्यावस्थितां सार्धत्रिवलयां 'हूं' बीजेनोत्थितां 'ऐं ह्रीं श्रीं' इति मन्त्रं च जपन् कुण्डलिनीं ध्यायेत्।

कुण्डलिनीमन्त्रः—

वाग्भवं भुवनेशी च श्रीबीजन्तु तथैव च।
त्र्यक्षरो मन्त्र आख्यातः कुण्डलिन्यास्सुसिद्धिदः।। १।।
ऋषिश्शक्तिस्समाख्यातो गायत्रीच्छन्द ईरितम्।
चेतनाकुण्डली शक्तिर्देवतात्र समीरिता।। २।।
वाग्भवं बीजमाम्नातं शक्तिः श्रीबीजमुच्यते।
हृल्लेखा कीलकं प्रोक्तं कुण्डलिन्यास्तु चिन्तने।। ३।।
विनियोगस्समाख्यातः सर्वागमविशारदैः।
बीजत्रयद्विरावृत्त्या षडङ्गन्यास ईरितः।। ४।।
ध्यानं वक्ष्यामि कुण्डल्यास्सावधानतया शृणु।
मूलाधारे त्रिकोणे तु सूर्यकोटिसमत्विषि।। ५।।
प्रसुप्तभुजगाकारां सार्धत्रिवलयस्थिताम्।
नीवारशुकवत्तन्वीं तडित्कोटिसमप्रभाम्।। ६।।
सूर्यकोटिप्रभां दीप्तां चन्द्रकोटिसुशीतलाम्।
शिवशक्तिमयीं देवीं शङ्खावर्तक्रमात्स्थिताम्।। ७।।
सुषुम्नामध्यमार्गेण यान्तीं परशिवावधि।
ह्रीङ्कारबीजरूपेण चिन्तयेद् योगवर्त्मना।। ८।।

अस्य श्रीकुण्डलिनीमन्त्रस्य शक्तिर्ऋषिर्गायत्री छन्दश्चेतना–कुण्डलिनी देवता ऐं बीजं श्रीं शक्तिः ह्रीं कीलकं श्रीकुण्डलिन्याश्चिन्तने विनियोगः।

(इति विनियोगं कृत्वा)

'ऐं ह्रीं श्रीं' इति मन्त्रेण करषडङ्गन्यासौ विधाय ध्यायेत्।

ध्यानम्

सिन्दूरारुणविग्रहां त्रिनयनां माणिक्यमौलिस्फुर–
त्तारानायकशेखरां स्मितमुखीमापीनवक्षोरुहाम्।
पाणिभ्यामलिपूर्णरत्नचषकं रक्तोत्पलं बिभ्रतीं
सौम्यां रत्नघटस्थसव्यचरणां ध्यायेत्परामम्बिकाम्।।

कुण्डलिनीस्तुतिः

मूलोन्निद्रभुजङ्गराजसदृशीं यान्तीं सुषुम्नान्तरं,
भित्त्वाधारसमूहमाशुविलसत्सौदामिनीसन्निभाम् ।
व्योमाम्भोजगतेन्दुमण्डलगलद्दिव्यामृतौघैः पतिं,
सम्भाव्य स्वगृहागतां पुनरिमां सञ्चिन्तयेत् कुण्डलीम्।। १।।

हंसं नित्यमनन्तमद्वयगुणं स्वाधारतो निर्गता,
शक्तिः कुण्डलिनी समस्तजननी हस्ते गृहीत्वा च तम्।।
याता शम्भुनिकेतनं परसुखं तेनानुभूय स्वयं,
यान्ती स्वाश्रममर्ककोटिरुचिरा ध्येया जगन्मोहिनी ।। २।।

अव्यक्तं परबिम्बमञ्चितरुचिं नीत्वा शिवस्यालयं,
शक्तिः कुण्डलिनी गुणत्रयवपुर्विद्युल्लतासन्निभा ।
आनन्दामृतकन्दगं पुरभिदं चन्द्रार्ककोटिप्रभं,
संवीक्ष्य स्वगृहं गता भगवती ध्येयाऽनवद्या गुणैः।। ३।।

मध्ये वर्त्म समीरणद्वयमिथस्सङ्घट्टसङ्क्षोभजं,
शब्दस्तोममतीत्य तेजसि तडित्कोटिप्रभाभास्वरे ।
उद्यन्तीं समुपास्महे नवजपासिन्दूरसान्द्रारुणां,
सान्द्रानन्दसुधामयीं परशिवं प्राप्तां परां देवताम्।। ४।।

गमनागमनेषु जाङ्घिकी सा तनुयाद् योगफलानि कुण्डली।
मुदिता कुलकामधेनुरेषा भजतां वाञ्छितकल्पवल्लरी।। ५।।

आधारस्थितशक्तिबिन्दुनिलयां नीवारशूकोपमां,
नित्यानन्दमयीं गलत्परसुधावर्षैः प्रबोधप्रदैः।
सिक्त्वा षट्सरसीरुहाणि विधिवत्कोदण्डमध्योदितां,
ध्यायेद् भास्वरबन्धुजीवरुचिरां संविन्मयीं देवताम्।। ६।।

हृत्पङ्केरुहभानुबिम्बनिलयां विद्युल्लतामन्थरां,
बालार्कारुणतेजसां भगवती निर्भर्त्सयन्तीं तमः।
नादाख्यां पदमर्धचन्द्रकुटिलां संविन्मयीं शाश्वतीं,
यान्तीमक्षररूपिणीं विमलधीर्ध्यायेद् विभुं तेजसाम्।। ७।।

भाले पूर्णनिशाकरप्रतिभटां नीहारहारत्विषा,
सिञ्चन्तीममृतेन देवममितेनानन्दयन्तीं तनुम्।
वर्णानां जननीं तदीयवपुषा संव्याप्य विश्वं स्थितां,
ध्यायेत् सम्यगनाकुलेन मनसा संविन्मयीमम्बिकाम्॥ ८॥

मूले भाले हृदि च विलसद्वर्णरूपा सवित्री,
पीनोत्तुङ्गस्तनभरनमन्मध्यदेशा महेशी।
चक्रे चक्रे गलितसुधया सिक्तगात्री प्रकामं,
दद्यादद्य श्रियमविकलां वाङ्मयी देवता नः॥ ९॥

आधारबन्धप्रमुखक्रियाभिः, समुत्थिता कुण्डलिनी सुधाभिः।
त्रिधामबीजं शिवमर्चयन्ती, शिवाङ्गना नः शिवमातनोतु॥ १०॥

निजभवननिवासादुच्चलन्ती विलासैः,
पथि पथि कमलानां चारु हासं विधाय।
तरुणतपनकान्तिः कुण्डली देवता सा,
शिवसदनसुधाभिर्दीपयेदात्मतेजः ॥ ११॥
सिन्दूरपुञ्जनिभमिन्दुकलावतंस-
मानन्दपूर्णनयनत्रयशोभिवक्त्रम्।
आपीनतुङ्गकुचनम्रमनङ्गतन्त्रं
शम्भोः कलत्रममितां श्रियमातनोतु॥ १२॥

वर्णैरर्णवषड्दिशारविकलाचक्षुर्विभक्तैः क्रमात्,
सान्तैरादिभिरावृतान् क्षहयुतैष्षट्चक्रमध्यानिमान्।
डाकिन्यादिभिराश्रितान् परिचितान् ब्रह्मादिभिर्दैवतै-
र्भिन्दाना परदेवता त्रिजगतां चित्तेषु दत्तां मुदम्॥ १३॥

आधाराद् गुणवृत्तशोभिततनुं निर्गत्वरीं सत्वरं,
भिन्दन्तीं कमलानि चिन्मयघनानन्दप्रबोधोद्धुराम्।
सङ्क्षुब्धं ध्रुवमण्डलामृतकरप्रस्यन्दमानामृत-
स्रोतःकन्दलिताममन्दतडिदाकारां शिवां भावये॥ १४॥

मूलाधारे त्रिकोणे तरुणतरणिभाभास्वरे विभ्रमन्तं,
कामं बालार्ककालानलजरठकुरङ्गाङ्ककोटिप्रभाभम्।

विद्युन्मालासहस्रद्युतिरुचिरलसद्बन्धुजीवाभिरामं,
त्रैगुण्याक्रान्तबिन्दुं जगदुदयलयैकान्तहेतुं विचिन्त्य ।। १५।।

तस्योर्ध्वे विस्फुरन्तीं स्फुटरुचिरतडित्पुञ्जभाभास्वराङ्गी–
मुद्गच्छतीं सुषुम्नामनुसरणिशिखामाललाटेन्दुबिम्बम्।
चिन्मात्रां सूक्ष्मरूपां जगदुदयकरीं भावनामात्रगम्यां,
मूलं या सर्वधाम्नां स्फुरति निरुपमा हूङ्कृतोदञ्चितोरः।। १६।।

नीता सा शनकैरधोमुखसहस्रारारुणाब्जोदरे,
च्योतत्पूर्णशशाङ्कबिम्बमधुनः पीयूषधारास्रुतिम्।
रक्तां मन्त्रमयीं निपीय च सुधानिःष्यन्दरूपा विशेद्,
भूयोऽप्यात्मनिकेतनं पुनरपि प्रोत्थाय पीत्वा विशेत्।। १७।।

योऽभ्यस्यत्यनुदिनमेवमात्मनोऽन्तर्बीजांशं दुरितजरापमृत्युरोगान्।
जित्वाऽसौ स्वयमिव मूर्तिमाननङ्गः, सञ्जीवेच्चिरमतिनीलकेशजालः।।१८।।

(इति तद्रश्मिनिकरभस्मितसकलकल्मषजालो "मूलं" मनसा दशवार-मावर्तयेत्।)

अजपाजपविधिः

अथ पूर्वेद्युः सूर्योदयादारभ्याद्यसूर्योदयपर्यन्तं षट्शताधिकैकविंशतिसाहस्रिकां निःश्वासोच्छ्वासरूपिणीमजपां मूलाधारादिब्रह्मरन्ध्रान्तसप्तचक्रनिवासिनीभ्यो देवताभ्यो निवेदयिष्ये, इति सङ्कल्प्य क्रमशो निवेदयेत्। यथा –

मूलाधारे चतुर्दलपद्मे वं शं षं सं चतुरक्षरे चतुष्कोणयन्त्रे ऐरावतवाहने लं बीजे स्थिताय सिद्धिबुद्धिसहिताय कुङ्कुमवर्णाय महागणपतये षट्शतमजपाजपं निवेदयामि।

स्वाधिष्ठाने षड्दलपद्मे बं भं मं यं रं लं षडक्षरे अर्धचन्द्रे यन्त्रे मकरवाहने वं बीजे स्थिताय सरस्वतीशक्तिसहिताय सिन्दूरवर्णाय ब्रह्मणे षट्सहस्रमजपाजपं निवेदयामि।

मणिपूरचक्रे दशदलपद्मे डं ढं णं तं थं दं धं नं पं फं दशाक्षरे त्रिकोणयन्त्रे मेषवाहने रं बीजे स्थिताय लक्ष्मीशक्तिसहिताय नीलवर्णाय विष्णवे षट्सहस्रमजपाजपं निवेदयामि।

अनाहतचक्रे द्वादशदलपद्मे कं खं गं घं ङं चं छं जं झं ञं टं ठं द्वादशाक्षरे षट्कोणयन्त्रे हरिणवाहने यं बीजे स्थिताय पार्वतीशक्तिसहिताय हेमवर्णाय परमशिवाय षट्सहस्रमजपाजपं निवेदयामि।

विशुद्धिचक्रे षोडशदलपद्मे अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं एं ऐं ओं औं अं अः षोडशाक्षरे शून्ययन्त्रे हस्तिवाहने हं बीजे स्थिताय प्राणशक्तिसहिताय शुद्धस्फटिकसङ्काशाय जीवाय सहस्रमेकमजपाजपं निवेदयामि।

आज्ञाचक्रे द्विदलपद्मे श्वेतवर्णे हं क्षं द्व्यक्षरे लिङ्गयन्त्रे नरवाहने प्रणवबीजे स्थिताय ज्ञानशक्तिसहिताय विद्युद्वर्णाय गुरवे सहस्रमेकमजपाजपं निवेदयामि।

ब्रह्मरन्ध्रे सहस्रदलपद्मे चित्रवर्णे अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं एं ऐं ओं औं अं अः कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं हं ळं क्षं इति विंशतिवारोच्चारिते सहस्राक्षरे विसर्गयन्त्रे बिन्दुवाहने पूर्णचन्द्रमण्डले आनन्दमहासमुद्रमध्ये चिन्मयमणिद्वीपे चित्सार-चिन्तामणिमयमन्दिरे कल्पवृक्षाधस्तले अव्याकृतब्रह्ममहासिंहासने स्थिताय नानावर्णाय वर्णातीताय चिच्छक्तिसहिताय परमात्मने सहस्रमेकमजपाजपं निवेदयामि। (इति निवेदयेत्।)

(अथ कतिचित् क्षणान् 'हंसः सोऽहम्' इति श्वासोच्छ्वासेषु भावयेत्।)

हकारेण बहिर्याति सकारेण विशेत् पुनः।
हंसोऽतिपरमं मन्त्रं जीवो जपति सर्वदा।।

(इति ध्यात्वा मानसैरुपचारैः सर्वान् देवान् पूजयेत्।)

॥ श्रीः ॥

* श्रीगुरुभ्योनमः श्रीमहागणपतये नमः *

॥ श्रीसच्चिदानन्दस्वरूपिण्यै श्रीललितामहात्रिपुरसुन्दर्यै नमः ॥

* श्रीविद्यावरिवस्या *

आब्रह्माण्डपिपीलिकान्ततनुभृत्सूज्जृम्भमाणा स्फुटं,
जाग्रत्स्वप्नसुषुप्तिभासकतया सर्वत्र या दीव्यति ॥
सा देवी जगदम्बिका भगवती श्रीराजराजेश्वरी,
श्रीविद्या करुणानिधिः शुभकरी भूयात्सदा श्रेयसे ॥

अथ प्रथममाह्निकप्रकरणम्

(ब्राह्मे मुहूर्ते चोत्थाय निद्रास्थानाद् बहिर्निर्गत्य पादौ मुखं च प्रक्षाल्याचम्य रात्रिवस्त्रं परित्यज्य शुद्धवस्त्रं परिधाय शुद्धासने उपविश्याज्ञाचक्रे कोटीन्दुप्रकाशे स्वगुरुं ध्यायेत)

ॐ आनन्दमानन्दकरं प्रसन्नं ज्ञानस्वरूपं निजबोधरूपम् ।
योगीन्द्रमीड्यं भवरोगवैद्यं श्रीमद्गुरुं नित्यमहं भजामि ॥

श्रीगुरुपादुकापञ्चकम्

ब्रह्मरन्ध्रसरसीरुहोदरे नित्यलग्नमवदातमद्भुतम् ।
कुण्डलीविवरकाण्डमण्डिते द्वादशार्णसरसीरुहं भजे ॥१॥
तस्य कन्दलितकर्णिकापुटे क्लृप्तरेखमकथादिरेखया ।
कोणलक्षितहलक्षमण्डलीं भावलक्ष्यमबलालयं भजे ॥२॥

तत्पुटे पटुतडित्कडारिमस्पर्द्धमानमणिपाटलप्रभम् ।
चिन्तयामि हृदि चिन्मयं वपुर्नादबिन्दुमणिपीठमुज्ज्वलम् ॥३॥
ऊर्ध्वमस्यहुतभुक्शिखात्रयं तद्विलासपरिबृंहणास्पदम्,
विश्वघस्मरमहोच्चिदोत्कटं व्यामृशामि युगमादिहंसयोः ॥४॥
तत्र नाथचरणारविन्दयोः कुङ्कुमासवपरीमरन्दयो ।
द्वन्द्वबिन्दुमकरन्दशीतलं मानसं स्मरति मङ्गलास्पदम् ॥५॥
निसक्तमणिपादुका-नियमितौघकौलाहलं,
स्फुरत्किसलयारुणं नखसमुल्लसच्चन्द्रकम् ॥
परामृतसरोवरोदितसरोज-सद्रोचिषं,
भजामि शिरसि स्थितं गुरुपदारविन्दद्वयम् ॥
अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥

'ऐं ह्रीं श्रीं हस्ख्फ्रें हसक्षमलवरयूं सहक्षमलवरयीं ह्सौः स्हौः स्वरुपनिरुपणहेत्वमुकाम्बासहितश्रीगुरुपादुकां पूजयामि ।'

स्वच्छ—प्रकाशविमर्शहेत्वमुकाम्बासहितश्रीपरमगुरुपादुकां पूजयामि

स्वात्मारामपञ्जरविलीनचेतस्कामुकाम्बासहितश्रीपरमेष्ठिगुरुपादुकां पूजयामि ।

(इतिगुरुपरमगुरुपरमेष्ठिगुरुपादुकापूजनं भावयेत्)

गुरुर्ब्रह्मागुरुर्विष्णुःगुरुर्देवोमहेश्वरः ।
गुरुः साक्षात्परं ब्रह्म तस्मै श्रीगुरवे नमः ॥

(इति प्रणम्य प्राणानायम्य च तच्चरणयुगलविगलदमृतरसविसर-परिप्लुताखिलाङ्गमात्मानं भावयेत् ।

ततश्च सर्वचैतन्यात्मिकां जाग्रदाद्यवस्थात्रयावभासिकां सर्वाधिष्ठान-रूपां प्रत्यक्चैतन्याभिन्नब्रह्मात्मिकां सर्वचैत्यविवर्जितामखण्डां चितिं भावयेत् ।

आमूलाधाराद्‌ब्रह्मबिलं विलसन्तीं तडिल्लतासदृशाकृतिंतरुणारुण-पिञ्जरां तैजसीं ज्वलन्तीं कुण्डलीरूपां सर्वाधिष्ठानभूतां परां संविदं भावयेत् ।

नियमितपवनस्पन्दो मूलाधारे चतुर्दलपद्मे त्रिकोणात्मकं पीठस्थित-ज्योतिर्लिङ्गमावेष्ट्यावस्थितां सार्धत्रिवलयां ॐ हूँ बीजेनोत्थितां 'ऐं ह्रीं श्रीं' इति मन्त्रं च जपन् कुण्डलिनीं ध्यायेत् ।

कुण्डलिनीमन्त्रः

अस्य श्रीकुण्डलिनीमन्त्रस्य शक्तिऋषिर्गायत्री छन्दश्चेतनाकुण्ड-लिनीदेवता ऐं बीजं श्रीं शक्तिः ह्रीं कीलकं श्रीकुण्डलिन्याश्चिन्तने विनियोगः ।

ऐं ह्रीं श्रीं इति मन्त्रेण करषडङ्गन्यासौ विधाय ध्यायेत्

ध्यानम्—सिन्दूरारुणविग्रहां त्रिनयनां माणिक्यमौलिस्फुरत्-
तारानायकशेखरां स्मितमुखीमापीनवक्षोरुहाम् ।
पाणिभ्यामलिपूर्णरत्नचषकं रक्तोत्पलं बिभ्रतीं
सौम्यां रत्नघटस्थसव्यचरणां ध्यायेत्परामम्बिकाम् ॥

कुण्डलिनीस्तुतिः

मूलोन्निद्रभुजङ्गराजसदृशीं यान्तीं सुषुम्नान्तरं,
भित्त्वाधारसमूहमाशु विलसत्सौदामिनीसन्निभाम् ।
व्योमाम्भोजगतेन्दुमण्डलगलद्दिव्यामृतौघैः पतिं
सम्भाव्य स्वगृहागतां पुनरिमां सञ्चिन्तयेत् कुण्डलीम् ॥१॥

हंसं नित्यमनन्तमद्वयगुणं स्वाधारतो निर्गता
शक्तिः कुण्डलिनी समस्तजननी हस्ते गृहीत्वा च तम् ।
याता शम्भुनिकेतनं परसुखं तेनानुभूय स्वयं,
यान्ती स्वाश्रममर्ककोटिरुचिरा ध्येया जगन्मोहिनी ॥२॥

अव्यक्तं परबिम्बमञ्चितरुचिं नीत्वा शिवस्यालयं,
शक्तिः कुण्डलिनी गुणात्रयवपुर्विद्युल्लतासन्निभा ।
आनन्दामृतकन्दगं पुरमिदं चन्द्रार्ककोटिप्रभं,
सन्वीक्ष्य स्वगृहं गता भगवती ध्येयाऽनवद्या गुणैः ॥३॥

मध्ये वर्त्म समीरणद्वयमिथस्सङ्घट्टसङ्क्षोभजं
शब्दस्तोममतीत्य तेजसि तडित्कोटिप्रभाभास्वराम् ।
उद्यन्तीं समुपास्महे नवजपासिन्दूरसान्द्रारुणां
सान्द्रानन्दसुधामयीं परशिवं प्राप्तां परां देवताम् ॥४॥

गमनागमनेषु जाङ्घिकी सा तनुयाद्योगफलानि कुण्डली ।
मुदिता कुलकामधेनुरेषा भजतां वाञ्छितकल्पवल्लरी ॥५॥

आधारस्थितशक्तिबिन्दुनिलयां नीवारशूकोपमां,
नित्यानन्दमयीं गलत्परसुधावर्षैः प्रबोधप्रदैः ।
सिक्त्वा षट्सरसीरुहाणि विधिवत्कोदण्डमध्योदितां,
ध्यायेद्भास्वरबन्धुजीवरुचिरां संविन्मयीं देवताम् ॥६॥

हृत्पङ्केरुहभानुबिम्बनिलयां विद्युल्लतामन्थरां
बालार्कारुणतेजसा भगवतीं निर्भर्त्सयन्तीं तमः ।
नादाख्यां परमर्धचन्द्रकुटिलां संविन्मयीं शाश्वतीं,
यान्तीमक्षररूपिणीं विमलधीर्ध्यायेद्विभुं तेजसाम् ॥७॥

भाले पूर्णनिशाकरप्रतिभटां नीहारहारत्विषा,
सिञ्चन्तीममृतेन देवममितेनानन्दयन्तीं तनुम् ।
वर्णानां जननीं तदीयवपुषा संव्याप्य विश्वं स्थितां,
ध्यायेत्सम्यगनाकुलेन मनसा संविन्मयीमम्बिकाम् ॥८॥

मूले भाले हृदि च विलसद्वर्णरूपा सवित्री,
पीनोत्तुङ्गस्तनभरनमन्मध्यदेशा महेशी ।
चक्रे चक्रे गलितसुधया सिक्तगात्री प्रकामं,
दद्यादद्य श्रियमविकलां वाङ्मयी देवता नः ॥९॥

आधारबन्धप्रमुखक्रियाभिः,
समुत्थिता कुण्डलिनी सुधाभिः ।
त्रिधामबीजं शिवमर्चयन्ती,
शिवाङ्गना वः शिवमातनोतु ॥१०॥

निजभवननिवासादुच्चलन्ती विलासैः,
पथि पथि कमलानां चारु हासं विधाय ।
तरुणतपनकान्तिः कुण्डली देवता सा,
शिवसदनसुधाभिर्दीपयेदात्मतेजः ॥११॥

सिन्दूरपुञ्जनिभमिन्दुकलावतंसमानन्दपूर्णनयनत्रयशोभिवक्त्रम् ।
आपीनतुङ्गकुचनम्रमनङ्गतन्त्रं शम्भोः कलत्रममितां श्रियमातनोतु ॥१२॥

वर्णैरर्णवषट्दिशारविकलाचक्षुर्विभक्तैः क्रमात् ।
सान्तैरादिभिरावृतान् सहयुतैष्षट्चक्रमध्यानिमान् ।
डाकिन्यादिभिराश्रितान् परिचितान् ब्रह्मादिभिर्दैवतै,
र्भिन्दाना परदेवता त्रिजगतां चित्तेषु दत्तां मुदम् ॥१३॥

आधाराद् गुणवृत्तशोभिततनुं निर्गत्वरीं सत्वरं,
भिन्दन्तीं कमलानि चिन्मयघनानन्दप्रबोधोद्धुराम् ।
सङ्क्षुब्धं ध्रुवमण्डलामृतकरप्रस्यन्दमानामृत
स्रोतः कन्दलितामन्दतडिदाकारां शिवां भावये ॥१४॥

मूलाधारे त्रिकोणे तरुणतरणिभाभास्वरे विभ्रमन्तं,
कामं बालार्ककालानलजरठकुरङ्गाङ्ककोटिप्रभाभम् ।
विद्युन्मालासहस्रद्युतिरुचिरलसद्बन्धुजीवाभिराम,
त्रैगुण्याक्रान्तबिन्दुं जगदुदयलयैकान्तहेतुं विचिन्त्य ॥
तस्योर्ध्वे विस्फुरन्तीं स्फुटरुचिरतडित्पुञ्जभाभास्वराङ्गी-
मुद्गच्छन्तीं सुषुम्नामनु सरणिशिखामाललाटेन्दुबिम्बम् ।

चिन्मात्रां सूक्ष्मरूपां जगदुदयकरीं भावनामात्रगम्यां
मूलं या सर्वधाम्नां स्फुरति निरुपमा हूङ्कृतोदश्चितोरः ॥१६॥

नीता सा शनकैरधोमुखसहस्रारारुणाब्जोदरे,
च्योतत्पूर्णशशाङ्कबिम्बमधुनः पीयूषधारास्रुतिम् ।
रक्तां मन्त्रमयीं निपीय च सुधानिःष्यन्दरूपा विशेद्,
भूयोऽप्यात्मनिकेतनं पुनरपि प्रोत्थाय पीत्वा विशेत् ॥१७॥

योऽभ्यस्यत्यनुदिनमेवमात्मनोऽन्त—
बींजांशं दुरितजरापमृत्युरोगान् ।
जित्वाऽसौ स्वयमिव मूर्तिमाननङ्गः,
सञ्जीवेच्चिरमतिनोलकेशजालः ॥१८॥

(इति तद्रश्मिनिकरभस्मितसकलकश्मलजालो मूलं मनसा दशवारमार्तयेत् ।)

अजपाविधिः

अथ षट् शताधिकैकविंशतिसाहस्रिकां निःश्वासोच्छ्वासरूपिणीं मूलाधारादिब्रह्मरन्ध्रान्तसप्तचक्रनिवासिनीभ्यो देवताभ्यो निवेदयामि; यथा,

मूलाधारे चतुर्दलपद्मे वं शं षं सं चतुरक्षरे चतुष्कोणयन्त्रे ऐरावत-वाहने लंबीजे स्थिताय सिद्धिबुद्धिसहिताय कुङ्कुमवर्णाय महागणपतये षट्शतमजपागायत्रीजपं निवेदयामि ।

स्वाधिष्ठाने षड्दलपद्मे बं भं मं यं रं लं षडक्षरे अर्धचन्द्रे यन्त्रे मकरवाहने वं बीजे स्थिताय सरस्वतीशक्तिसहिताय सिन्दूरवर्णाय ब्रह्मणे षट्सहस्रमजपाजपं निवेदयामि ।

मणिपूरचक्रे दशदलपद्मे डं ढं णं तं थं दं धं नं पं फं दशाक्षरे त्रिकोणयन्त्रे मेषवाहने रं बीजे स्थिताय लक्ष्मीशक्तिसहिताय नीलवर्णाय विष्णवे षट्सहस्रमजपाजपं निवेदयामि ।

अनाहतचक्रे द्वादशदलपद्मे कं खं गं घं ङं चं छं जं झं ञं टं ठं द्वादशाक्षरे षट्कोणयन्त्रे हरिणवाहने स्थिताय पार्वतीशक्तिसहिताय हेमवर्णाय परमशिवाय षट्सहस्रमजपाजपं निवेदयामि ।

विशुद्धिचक्रे षोडशदलपद्मे अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः षोडशाक्षरे शून्ययन्त्रे हस्तिवाहने स्थिताय प्राणशक्तिसहिताय शुद्धस्फटिकसङ्काशाय जीवाय सहस्रमेकमजपाजपं निवेदयामि ।

आज्ञाचक्रे द्विदलपद्मे श्वेतवर्णे हं क्षं द्व्यक्षरे लिङ्गयन्त्रे नरवाहने स्थिताय ज्ञानशक्तिसहिताय विद्युद्वर्णाय गुरवे सहस्रमेकमजपाजपं निवेदयामि ।

ब्रह्मरन्ध्रे सहस्रदलपद्मे चित्रवर्णे अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः कं खं ग घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं हं ळं क्षं इति विंशति वारोच्चारिते सहस्राक्षरे त्रिसर्गयन्त्रे बिन्दुवाहने पूर्णचन्द्रमण्डले आनन्द-

महासमुद्रमध्ये चिन्मयमणिद्वीपे चित्सारचिन्तामणिमयमन्दिरे कल्पवृक्षा-धस्तले अव्याकृतब्रह्ममहासिंहासने स्थिताय नानावर्णाय वर्णातीताय चिच्छक्तिसहिताय परमात्मने सहस्रमेकमजपाजपं निवेदयामि।
(इति निवेदयेत ।)

अथ कतिचित क्षणान् हं सः सोऽहमिति श्वासोच्छ्वासेषु भावयेत्।

हकारेण बहिर्याति सकारेण विशेत्पुनः।
हंसोऽतिपरमं मन्त्रं जीवो जपति सर्वदा॥

(इति ध्यात्वा मानसैरुपचारैः सर्वान् देवान् पूजयेत ।)

लं पृथिव्यात्मकं गन्धं समर्पयामि। (कनिष्ठिकाङ्गुष्ठाभ्याम्)।
हं आकाशात्मकं पुष्पं समर्पयामि। (अङ्गुष्ठतर्जनीभ्याम्)।
यं वाय्वात्मकं धूपमाघ्रापयामि। (तर्जन्यङ्गुष्ठाभ्याम्)।
रं वह्न्यात्मकं दीपं दर्शयामि। (अङ्गुष्ठमध्यमाभ्याम्)।
वं अमृतात्मकं नैवेद्यं निवेदयामि। (अङ्गुष्ठानामिकाभ्याम्)।
सं सर्वात्मकं तम्बूलादिसर्वोपचारान् समर्पयामि। (साङ्गुष्ठाभिस्स र्वाभिः ।)

(आमूलाधारादाब्रह्मबिलं विलसन्त्यां बिसतन्तुतनीयस्यां विद्युत्पुञ्जपिञ्जरायां विवस्वदयुतप्रकाशायां कुण्डलिन्यामेव निम्नाङ्कितेषु चक्रेषु श्रीचक्रस्थितां देवतां भावयन् पूजयेत् ।)

तद्यथा :

मूलाधारादधोगते अकुलसहस्रारे देहश्रीचक्रयोरभेदेन भूपुरस्थिता अणिमादिदेवीः पूजयामि ।

तदुपरि स्थिते विषुवन्नाम्नि रक्तवर्णे पड्दले षोडशदलगतकामाकर्षिण्यादिदेवीः पूजयामि ।

मूलाधारे चतुर्दलेऽष्टदलगतानङ्गकुसुमादिदेवीः पूजयामि ।

स्वाधिष्ठाने षट्दलेचतुर्दशारगतसर्वसङ्क्षोभिण्यादिदेवीः पूजयामि ।

मणिपुरे दशदले बहिर्दशारगतसर्वसिद्धिप्रदादिदेवीः पूजयामि ।

अनाहते द्वादशदलेऽन्तर्दशारगतसर्वज्ञादिदेवीः पूजयामि ।

विशुद्धे षोडशदलेऽष्टारगतवशिन्यादिदेवीः पूजयामि ।

लम्बिकाग्रे रेखालये आयुधदेवीस्त्रिकोणगतमहाकामेश्वर्यादिदेवीश्च पूजयामि ।

आज्ञायां द्विदले बिन्दुगतश्रीललितामहात्रिपुरसुन्दरीं कामेश्वराङ्कनिलयां देवीं पूजयामि । इति ।

(श्रीमहात्रिपुरसुन्दर्यां सचक्रावयवान्यावरणानि विलीनानि विभाव्य मध्यत्र्यश्राग्रे स्थितजीवात्मना सहितां देवीं हृदयं नीत्वा स्वाञ्जलिकुसुमैस्तां सम्पूज्य ततोऽकुलेन्दुगलितामृतधारारूपिणीः चन्दनकुसुमधूपदीपनैवेद्यशालिकरकमलाः पीतासितश्यामरक्तशुक्लवर्णाः भूवियदनिलानलजललक्षणाः पञ्चभूतमयीः सर्वावयवसुन्दरीः पञ्च देवता देव्यग्रे पञ्चोपचारमुद्राश्च प्रदर्शिता भावयेत् ।

योग आसन से महायोग तक

भारतीय ऋषियों, मुनियों, योगियों और साधकों ने अपने अथक प्रयास व अनुभव और ईश्वर या शिव की अनुकम्पा व कृपा से, योग आसनों को धरती पर संसारी जीव या मनुष्य के उत्थान के लिए अवतरित किया; ताकि मोहमाया, छल–कपट, झूठफरेब और बीमार देह से पीड़ित मानव, इन आसनों के प्रयोग से तामसिक व मानसिक विकारों को दूर कर और स्वास्थ लाभ करके, अपने आप को निरोग रख सकें।

इन आसनों के करने से, शरीर के प्रत्येक भाग से दूषित द्रव्य व मल के विसर्जन में आसानी होती है। दूषित द्रव्य व मल के बाहर निकलते ही, शरीर की बीमारियां दूर होकर, शरीर में स्फूर्ति व पुष्टि आती है। इस तरह यौवन स्थिर हो जाता है। नियमित आसनों के करने से, अशुद्ध रक्त, शुद्ध होकर, शरीर के प्रत्येक अंग का पोषण करती है। त्वचा को नर्म बनाकर, शरीर के सौंदर्य को बढ़ाती है; चेतन नाड़ियां प्रबल होकर, मानसिक एकाग्रता को दृढ़ व स्थिर करती हैं; मन में सत्वगुणी विचारों की वृद्धि होती है; रजोगुण व तमोगुण विचार कम हो जाते हैं। इस तरह अच्छे विचारों के आते ही मन, चित, निर्मल और शुद्ध होकर शान्त हो जाता है।

साधकों, भक्तों व आम प्राणियों, मनुष्यों के लिए, कुछ मुख्य उपयोगी आसन इस तरह से हैं। इन आसनों के करने से, जहां प्राणियों का स्वास्थ लाभ होगा; वहीं दूसरी ओर साधकों, भक्तों का ध्यान स्थिर होने में व सिद्धियां प्राप्त करने से सहायता मिलेगी।

मुख्य आसन :– सिद्धासन, पदमासन, सिंहासन, शीर्षासन, शिरासन, गरुड़ासन, पश्चिमोतमानासन, व्रजासन, शवासन और प्राणायाम आदि।

आसनों पर बैठने से पहले यह ध्यान रखें, कि आसन स्वच्छ जगह पर, किसी मोटे ऊनी वस्त्र या कम्बल का ही हो। एक आसन करने के बाद, थोड़ा विश्राम करके ही अन्य या दूसरे आसन करें।

सिद्धासन

यह आसन कमर को सीधा रखते हुए, चौकटी मारकर या बैठ कर किया जाता है। इस आसन में, प्राणायाम द्वारा सांस रोकना पड़ता है। इस आसन के करने से, पेट तथा रीढ़ की हड्डी सम्बन्धी रोग, शनैः शनैः दूर हो जाते हैं। यह आसन मानसिक व्याधियों को दूर करके स्मरण शक्ति को तीव्र व ब्रह्मचार्य को स्थिर करता है। शूरु–शुरु में आसन कुछ मिन्ट किया जाता है। शनैः शनैः समय सीमा बढ़ाई जा सकती है। इस आसन को करने से सिद्धि प्राप्त होती है।

पदमासन

यह आसन बैठ कर, कमर को सीधे रखते हुए, दायां पांव बाईं जांघ पर व बायां पांव दायीं जांघ पर रख कर और दायां हाथ दायें घुटने पर व बायां हाथ बायें घुटने पर रख कर किया जाता है। साधक की दृष्टि, नासांग्र या भ्रू–मध्य पर स्थिर होनी चाहिये। आसन के करने से ब्रह्मचार्य में वृद्धि और मानसिक शक्ति का विकास होता है। इस आसन की सिद्धि से, कुण्डलिनी शक्ति जागृत होती है।

सिंहासन

इस आसन में दाएं पांव की एड़ी, बाई ओर व बाएं पांव की एड़ी दाएं ओर अण्डकोषों के नीचे रखकर बैठना चाहिए। हाथों की हथेलियों को फैलाकर, घुटनों पर टिका रखें। कमर को सीधा रखते हुए, मुंह को पूर्ण रुप से खुला रख कर, जीभ को पूरा बाहर निकालें। दृष्टि को नासिका के अग्रभाग पर स्थिर रखें। इस आसन के करने से घुटनों, एड़ियों व मूत्र सम्बन्धी रोग दूर हो जाते हैं, इस आसन के करने से स्मरण शक्ति की वृद्धि होती है। शरु में आसन कुछ मिन्टों का कर ले। आहिस्ता – आहिस्ता समय सीमा बढ़ाई जा सकती है।

शीर्षासन

इस आसन को सिर के बल, खड़ा रहने से किया जाता है। सिर के नीचे धरती पर चार या छह अंगुल मोटा गदेले का नर्म आसन रखा जा सकता है;

ताकि आसन पर सिर रखने से या के बाद मस्तक को कोई कष्ट न हो। आसन पर सिर रखते समय, अपने दोनों हाथों से, सिर को पिछली तरफ से पकड़ कर रखें। फिर अपनी दोनों टांगें व पांवों को दीवार के सहारे सीधा खड़ा करें। अभ्यास के बाद, सहारे की आवश्यकता नहीं रहती है। इस आसन को शुरु–शुरु में कुछ सैकेन्ड से ज्यादा न करें। दस बारह दिन के बाद, थोड़ा–थोड़ा समय बढ़ाया जा सकता है। इस आसन के करने से, स्वपनदोष नहीं होता है व शारीरिक कमज़ोरी दूर होती है। आँखों का प्रकाश तेज़ होता है व आँखों व मस्तिष्क के सारे रोग दूर होकर, सफेद बाल काले हो जाते हैं।

शिरासन

दोनों पावों को धरती पर सीधा रख कर बैठ जाएं। अब बाएं पांव को मोड़कर, एड़ी को अण्डकोष के पास, जांघ से सटा कर रखें। दोनों हाथों की अंगुलियों को कैंची बनाकर दाएं पांव के पंजे को, अच्छी तरह पकड़ कर रखें। अपने सिर को धीरे–धीरे दायीं टांग के घुटने पर रखने का प्रयत्न करें। शुरु–शुरु में, ऐसा करने में कष्ट होगा। लेकिन शनैः शनैः अभ्यास द्वारा आसन लगाना आसान हो जायेगा। फिर दाएं पांव को मोड़कर व एड़ी को अण्डकोष के पास, जांघ से सटाकर रखें। दोनों हाथों की अंगुलियों को ऊपर दिखाए गए, विधि से फिर दोहराए। शुरु–शुरु में आसन तीन चार मिन्टों का किया जा सकता है। आहिस्ता–आहिस्ता, समय सीमा बढ़ाई जा सकती है। इस आसन के करने से उदर, गुदा सम्बन्धी व्याधियां व विकार दूर हो जाते हैं। इस आसन से, मेरुदण्ड में लचीलापन और दृढ़ता आकर, कमर के स्नायु सुदृढ़ होते हैं।

गरुड़ासन

इस आसन को करने के लिए, सब से पहले दाएं पैर पर खड़ा रहें। फिर बांए पैर व टांग को आगे ले जाकर दाएं पैर व टांग से लपेट लें। इसी तरह बाएं हाथ व बाजू को दाएं हाथ व बाजू से लपेट कर, मुंह के सामने स्थिर रखें। इस तरह कुछ मिन्ट रहने के बाद स्थिति बदल सकते हैं। शुरु – शुरु में, आसन ज्यादा समय न करें। इस आसन के करने से हाथ, पांवों, घुटनों व जोड़ों का दर्द या तो कम हो जाता है या पूरी तरह से ठीक होता है। यह आसन एकाग्रता को बढ़ाता है।

पश्चिमोतमानासन

इस आसन को करने के लिए, दोनों टांगों व पांवों को सीधे रखकर, धरती से सटा कर बैठ जाएं। अब दोनों दाएं और बाएं हाथों की अंगुलियों से दाएं और बाएं पांवों के अंगूठों को पकड़ने की कोशिश करके सिर को घुटनों पर रखने की चेष्टा करें। शुरु–शुरु में, आसन को करने में कष्ट होगा। लेकिन अभ्यास होने पर अच्छा लगेगा। इस आसन के करने से रीढ़ की हड्डी लचीली बनती है। उदर और मुदा के विकार दूर हो जाते हैं। स्वपनदोष दूर होकर, शारीरिक शक्ति में वृद्धि होती है। शरीर में चुस्ती, फुर्तीलापन व उत्साह आता है और शक्ति सम्पन्न बनता है। आसन सिद्ध होने पर, कुण्डलिनी शक्ति जागृत होती है।

वज्रासन

इस आसन को करने के लिए, अपने दोनों पैरों के तल्वों को गुदा के दोनों तरफ सटाकर, घुटनों के बल बैठ जाएं। पांव की अंगुलियों का ऊपर वाला भाग धरती को स्पर्श करें। फिर इसी दशा में, पीठ के बल धरती पर लेट जाएं। अपने दोनों हाथों की अंगुलियों को, एक दूसरे से सटाकर सिर के पिछले भाग के साथ धरती से सटाकर रखें। थुड़ी को भी कण्ठमूल से लगा कर रखें। यह आसन कुछ मिन्ट किया जा सकता है। कुछ दिन बाद, थोड़ी–थोड़ी समय सीमा बढ़ाई जा सकती है। इस आसन के करने से, पांव, घुटनों, पेट व हाथ सम्बंधी रोग, दर्द व किसी भी प्रकार का कष्ट दूर हो जाते हैं।

शवासन

इस आसन को करने से पहले, कोई मोटा वस्त्र, कम्बल समतल जगह पर बिछा कर रखें। अपने मुंह और पेट को आकाश की ओर करके लेट जाएं। यह आसन अन्य आसनों के अन्त में किया जाता है। इस आसन को करने से शरीर को पूर्ण विश्राम मिलता है और थकावट दूर हो जाती है। शरीर के प्रत्येक भाग को शुद्ध रक्त मिलता है। सम्पूर्ण नाड़ियों का पोषण करके मानसिक शक्ति का विकास होता है। मन शान्त होकर स्थिर हो जाता है।

प्राणायाम

महर्षि पतंजली के अनुसार, श्वास–प्रश्वास की गति विच्छेद का नाम प्राणायाम है। प्राणायाम के तीन भाग हैं। पहला रेचक, दूसरा पूरक, और तीसरा कुम्भक है। श्वास बाहर निकालने को रेचक, श्वास अन्दर खींचने को पूरक और श्वास अन्दर शरीर में रोक लेने को कुम्भक कहते हैं। पूरक करने से प्राण का हवन, रेचक करने से अप्राण का हवन, तथा कुम्भक करने से, प्राण अप्राण को मिलाने से प्राणायाम परायण होना कहलाता है। प्राणायाम का अभ्यास करने से, जब प्राण–अप्राण मिल जाते हैं या कुम्भक हो जाता है, तब मूलाधार में चित या मन द्वारा ध्यान करने से कुण्डलिनी शक्ति जागृत हो जाती है। जागृत कुण्डलिनी, साधक या योगी के मनोरथ पूर्ण करती हुई सिद्धियाँ प्रदान करती है।

प्राणायाम की विधि :– प्राणायाम करने का स्थान शुद्ध, साफ, एकान्त, हवादार घर का कमरा या कोई अन्य एकान्त साफ सुथरी जगह होनी चाहिए। प्राणायाम प्रातः या सांयकाल खाली पेट किया जा सकता है। प्राणायाम करते समय प्रसन्न, विषय विकारों से रहित व पवित्र रहने की कोशिश करें। प्राणायाम, पूर्व की तरह मुंह करके, सिद्धासन या पदमासन में, एकान्त जगह में आसन पर बैठ कर, ईश्वर, गुरु का नाम लेकर शुरु करें। मन में किसी प्रकार की चिन्ता न रखें। अभ्यास द्वारा प्राणायाम, प्राण–अप्राण के मिल जाने से सिद्ध हो जाता है।

इन आसनों के करने से, जहां शरीर की विकृतियां दूर होती है, बल की वृद्धि होती है; तो दूसरी ओर यदि मनुष्य चाहे, तो अपने मलिन मन को, जगदाभिमुखी भावों से मोड़कर, अन्तर्मुखी करके, प्रभू प्रेम का विकास करके, ईश्वर से एकाकार भी कर सकता है। इस तरह शारीरिक शक्ति के साथ–साथ, आत्मिक शक्ति का भी अनुभव होता हैं। बस प्रभल इच्छा–शक्ति की आवश्यकता है।

सालों साल के प्रयास द्वारा इन आसनों के करने पर, आत्मिक शक्ति का विकास होता है। तब प्राणवायु के वेग से मूलाधार का द्वार खुल जाता है। जहां सोई हुई कुण्डलिनी शक्ति जागृत होकर सहस्त्रार में जाकर, साधक, भक्त के मनोरथ पूर्णकरती हुई समाधि का महा–आनन्द प्रदान करती है।

मन प्रकृति की सीमा से कुछ आगे चल कर विचार शून्य हो जाता है। तब प्रथम महा–आनन्द की शब्द ध्वनि सुनकर, मन व आत्मा प्रसन्नचित व प्रफुलित होने लगती है। इस तरह भाग्यवान साधक या योगी के कर्णकपाट खुल जाते हैं। फिर अभ्यास द्वारा साधन की समय सीमा बढ़ाकर अन्य अनुभव प्राप्त होते हैं।

कुण्डलिनी शक्ति, जहां अपने अथक सालों साल के प्रयास द्वारा जागृत होती है। वहीं दूसरी ओर, शक्ति के सामर्थ्य गुरु द्वारा भी कुण्डलिनी जागृत होती है। जो कुछ क्षणों से लेकर एक साल तक जागृत होती है। कुण्डलिनी जागृति, गुरु की शक्तियों पर निर्भर है। गुरु की शक्ति अगर ज्यादा है, तो कुण्डलिनी जल्दी जागृत होती है।

कुण्डलिनी शक्ति की जागृति में साधक या शिष्य का अपना प्रयास कुछ भी नहीं होता। बल्कि, कुण्डलिनी जागृति, गुरु की अनुकम्पा व कृपा का फल है। कुण्डलिनी शक्ति के मूलाधार से ऊपर उठने पर अनेक चक्रों से होकर जाना पड़ता है। शक्ति के इन चक्रों से होकर जाने पर, साधक या योगी को अनेक अनुभूतियां होती हैं। वह ब्रह्मांड के विभिन्न रहस्यों को जानने की क्षमता प्राप्त करता है। इस तरह शक्ति, चक्रों से होती हुई, सातवें चक्र सहस्त्रार तक पहुंचती है। जहां शिव, वाहेगुरु, परमब्रह्म, परम-शिव, शक्तिपुन्ज, महाजोत, निराकार, अखंडजोत, ईश, परमेश्वर, जगदीश्वर का वास है। यहां पर साधक या योगी, शिव से एकाकार कर या मिलकर, महा–समाधि, मुक्ति या निर्वाण प्राप्त करते हैं।

महा–शक्ति के इन आलौकिक चक्रों का विवरण इस तरह से है :–

(१) मूलाधार चक्र (२) स्वाधिष्टान चक्र (३) मणिपुर चक्र

(४) अनाहत चक्र (५) विशुद्ध चक्र (६) आक्षा चक्र

(७) सहस्त्रार चक्र

जय शिव–शक्ति, जय गुरु देव, जय माताश्री, जय–भारत

–इति–

प्राण - प्राण शक्ति

परमेश्वर ने अपनी लीलाओं से, इस ब्रह्मांड के कण–कण, जीव–जन्तुओं व वंस्पति को कार्यशील व चेतन रखने के लिए, शक्तियों द्वारा उनमें जीवन या जीवन शक्ति का संचार किया है। इस जीवन या जीवन शक्ति को प्राण या प्राण शक्ति भी कहते हैं। जब तक मनुष्य जीवित अवस्था में है, तब तक आत्मा के साथ, प्राण और सूक्ष्म शरीर भी, स्थूल शरीर के साथ रहता है। स्थूल शरीर, बार–बार जन्म लेता और मर जाता है। लेकिन सूक्ष्म शरीर मरता नहीं है। आत्मा मृत्युपरान्त प्राण, सूक्ष्म शरीर व पूर्व संस्कारों को साथ लेकर, नये कारण शरीर में जन्म ग्रहन करता है।

मृत्यु होने के उपरान्त या यू कहिये, कि आत्मा मृत शरीर छोड़ने के बाद, प्राण, सूक्ष्म शरीर और पूर्व संस्कारों को भी साथ लेकर जाता है। मृत्यु, सूक्ष्म शरीर को प्राण से अलग नहीं कर सकता है। जीव में क्रियाशील या कार्यशील प्राण, मृत्यु के उपरान्त अपना कार्य बंद कर देता है। प्राण सुषिप्ति अवस्था में, आत्मा व सूक्ष्म शरीर के साथ ही रहता है। सूक्ष्म शरीर अपने साथ मृत जीव या मनुष्य द्वारा किये गए पूर्व कर्म, बुद्धि, ज्ञान, मूढ़ता व अहंकार आदि साथ लेकर जाता है। इस के बाद प्रकृति, जीव आत्मा के पूर्व कर्मो द्वारा निर्धारित, सूक्ष्म शरीर के साथ, नये शरीर की संरचना करके, उसमें प्रतिरोपित कर देता है या भेज देता है। जितने अच्छे पूर्व कर्म हो, उतना ही नया जन्म या उतम नया जन्म, आत्मा को प्रकृति से मिलता है। अगर जीव के कर्म शून्य या पाप पुन्य समाप्त हो गए या पूर्व जन्मों का जप, तप, ज्ञान, ध्यान, भक्ति व कर्मयोग द्वारा अपने जगदाभिमुखी भावों को अन्तर्मुखी कर लिया या ईश्वर प्राप्ति का सहज मार्ग ढुड लिया है, तो ऐसा जीव, समाधि द्वारा ईश्वर से मिलने का अधिकारी होता है।

प्राण का जीव के मस्तिशक के साथ–साथ , आंख, कान, नाक, मुंह व श्वास पर पूरा नियंत्रन है। प्राण, जीव में अनेक प्रकार के कार्य करता है, जिन्हें अलग–अलग नामों से जाना जाता है। प्राण ने सारे शरीर के नियंत्रन व कार्य के लिए, अपनी क्षमताओं को पांच भागों में विभक्त किया है। प्राण अपना कार्य विशेष नाड़ियों द्वारा करता है। प्राण, पेट के नीचे वाले भाग को 'अपान', मध्य भाग को 'सम्मान', दिल वाले भाग को 'व्यान'; 'ऊदान' मास पेशियों को सुदृढ़ रखने के लिए मृत्युपरान्त भी अगले जन्म के लिए कार्य करता है। श्वास–प्रश्वास के लिए 'प्राण' कार्य करता है। प्राण की गति, सारे भागों में अविलम्ब होती रहती है। इस तरह प्राण–शक्ति को, जीवनी–शक्ति भी कहते हैं।

इस प्राण पर, जीव या मनुष्य का कोई नियंत्रन नहीं है। प्राण अपना कार्य, खुद बिना किसी विघ्न या नियंत्रन के करता है। मनुष्य की मृत्यु के उपरान्त,

प्राण सुषुप्ति अवस्था में, आत्मा के साथ ही चला जाता है। देखा गया है, कि कुछ योगियों ने प्राण शक्ति या कण्डलिनी शक्ति को नियंत्रित करके, दूसरे प्राणियों में संचारित किया है। इस तरह शक्ति का एक प्राणी से दूसरे प्राणी में भेजने या जाने को शक्तिपात कहते हैं। आम संसारी मनुष्य के लिए, ऐसा करना सहज नहीं है। इसे शक्तिपात के सामर्थ्य गुरु या योगी ही कर सकता है।

सूर्य या चंद्रमा को किरणों से, गर्मी, प्रकाश व शीतलता, जीव के शरीर, मस्तिश्क, मन, चित व प्राण पर बड़ा प्रभाव डालती है। इन के प्रभाव से मानव में, तमोगुण, रजोगुण व सत्वगुण की बढ़ोतरी होती है। सूर्य की गर्मी से शरीर को जहां बल मिलता है, वहीं आलस्य भी आ जाता है। जबकि प्रकाश व शीतलता, दृष्टि को स्थिर करके मस्तिश्क व बुद्धि पर अच्छा प्रभाव डालती है। चांदनी रात की शीतलता व शीतल प्रकाश, मनुष्य के आध्यात्मिक उन्नति व उत्थान के लिए आवश्यक है। योगियों, सन्त, महात्माओं, ध्यानियों, साधकों आदि ने एकाग्रता व ध्यान के लिए प्रातः चार बजे का समय निश्चित किया है। प्राण को सूर्य (Solar) और मन, चित को चंद्रमा (lunar) सम्बंधी कहा गया है। सूर्य की तेजमय किरणों की गर्मी और चंद्रमा के शीतल प्रकाश से, इस धरती के प्राणमय जीव, जन्तु व वंस्पति प्रभावित होते रहते हैं।

प्राणमय शरीर में तीन प्रकार की सूक्ष्म नाड़ियां है, जो मूलाधार से शुरु होकर, सहस्त्रार तक जाती है। इन तीन नाड़ियों को सुषुभ्ना, ईड़ा और पिंगला कहते हैं। मूलाधार से कुण्डलिनी–शक्ति जागृत होने पर, सुषुम्ना से होती हुई सहस्त्रार तक जाती है। जहां खुद परम पिता परमात्मा, ईश्वर, अखण्डजोत शक्तिपुंज, वाहेगुरु का वास है। बाकी दोनों नाड़ियां ईड़ा (बाईं ओर) पिंगला (दाईं ओर) में, प्राण वायु की गति ऊपर नीचे बनी या होती रहती है।

जीव –जन्तु, वायु या सांस नासिका से लेते हैं। जब वायु नासिका के दाएं भाग से होकर, अन्दर फेपड़ों में चली जाती है; तब शरीर में, गर्मी का एसास होता या आभास होता है; क्योंकि, दांए नासिका भाग को सूर्य प्रभावित करता है। इसी तरह, वायु नासिका के बाएं भाग से अन्दर फेपड़ों में चली जाती है; तो, शरीर में शीतलता का एसास होता है; क्योंकि, बांए नासिका भाग को चंद्रमा प्रभावित करता है।

सूर्य की उश्मा हमारे प्राण को प्रभावित करके, शरीर की मास पेशियों को सुदृढ़ व श्वास – प्रश्वास को सामान्य और अन्न का पाचन करके या पचाकर, दूषित द्रव्य को शरीर से बाहर निकालने में सहायता करता है। अगर कहा जाए, सूर्य प्राण शक्ति को बढ़ाने का कारण है, तो गल्त बात नहीं है। चंद्रमा हमारे मन व चित को प्रभावित करता है। चंद्रमा के प्रभाव से मनुष्य अध्यात्म की ऊंचाईयों को छू सकता है। अगर इच्छा–शक्ति प्रबल हो, तो मोक्ष, समाधि, निर्वाण, ईश्वर प्राप्ति का भी अधिकारी हो सकता है। जहां नासिका के दाएं भाग से ही, सांस लेने पर, शरीर तंत्र में अधिक गर्मी बढ़ने से हानि होने का ड़र है। वहीं दूसरी ओर, नासिका के बांए भाग से ही सांस लेने पर, शरीर तंत्र में, अधिक शीतलता

से हानि होने का भी डर है। नासिका के कभी दाएं, कभी बांए भाग से, सांस लेने पर शरीर में संतुलित उश्मा व शीतलता का समावेश होता है। दोनों नासिका छिद्रों से एक साथ सांस लेने पर, शरीर तंत्र पर कोई हानि नहीं होती या कोई बुरा प्रभाव नहीं पड़ता है। ऐसा समय ध्यान, धारणा, साधना के लिए उपयुक्त बताया गया है।

जीव के बाएं भाग का नाड़ी तंत्र, जिसे योगिक भाषा में ईड़ा और दाएं भाग का नाड़ी तंत्र, पिंगला, चंद्रमा व सूर्य से प्रभावित होता है। जहां एक ओर सूर्य, प्राण और शरीर के अंगों का पोषण करके मांस पेशियों को हष्ट–पुष्ट व निरोग रखने में सहायता करता है, वहीं दूसरी ओर, चंद्रमा अपनी शीतलता से शरीर के अवरोधों को दूर करके, शान्ति, स्थिरता व मन, चित्त को शुद्ध करने में सहायता करता है। अगर प्रबल इच्छा शक्ति हो, तो अध्यात्म की उंचाईयों की ओर ले जाता है। योगियों ने ईड़ा की तुलना गंगा जी के शीतल व शुद्ध जल से की है; जो मनुष्य के बांए भाग से बहती रहती है; जिस में, गोता लगाने से, याने कि अपने अन्दर के विकारों को ध्यान, धारणा, जप, तप द्वारा समाप्त करना है। जिसे साधक याा भक्त का चित शुद्ध होकर, शान्त हो जाता है। पिंगला की तुलना, जमुना जी के शुद्ध जल से की है, जिस का प्रभाव सूर्य की तरह गर्म है। इस में गोता लगाने पर, अपने अन्दर के संचित पापों का नाश होता है। यह साधक के पाचन क्रिया को ठीक करके, शरीर को स्वास्थ व निरोग रखता है।

एक ओर जहां ईड़ा शरीर में शीतलता व स्थिरता लाती है; तो दूसरी और, पिंगला शरीर तंत्रों का पोषण करके शरीर को स्वास्थ रखती है। यह दोनों नाड़ियां, भौहों के मध्य में मिलती है और इस स्थान को, 'आज्ञा चक्र' कहते है। इसी 'आक्षा चक्र' पर ध्यान केन्द्रित या स्थिर करने से, योगी या साधक का चित्त शान्त हो जाता है और फिर शान्त चित, प्राण में विलय होकर, सहस्त्रार में जाता है। जहां योगी या भक्त या ध्यानी, समाधी का आनन्द उठाकर, परमेश्वर, परम–शक्ति, अखंड–जोत, शक्ति–पुंज, आदि–देव, परम–शिव, परम–ब्रह्म, सचिदानन्द, शिव–शक्ति, निराकर की अनुभूति प्राप्त करके एकाकार हो जाता है।

धार्मिक पुस्तकों में, गंगा जी, यमुनाजी, में नहाने या गोता लगाने से, पापों का नाश होकर, शुद्ध होने का बड़ा महत्व दिया जाता है। इन पुस्तकों में लिखें बातों का अभिप्राय यह है, कि अपने अन्दर से जो गंगा यमुना, ईड़ा पिंगला में प्रवाहित होती है। उन्हीं में डुबकी लगाने से अपने पापों का होम करके, शुद्धि करना है। यानेकि, अपनी चित शुद्धि के लिए, विषय वासनाओं व वृतियों को छोड़ने का योग, साधना, ध्यान, धारणा, जप, तप, भक्ति द्वारा प्रयास करना है। गंगा जी, यमुना जी में नहाने से, शरीर के बाहरी भागों की शुद्धि हो जाती है; अन्दर वाले भागों की नहीं। इस लिए अन्दर वाले भागों की शुद्धि करनी है। जय–गुरु देव, जय शिव–शक्ति, जय–माताश्री, जय–भारत

–इति–

महा शक्ति - कुण्डलिनी शक्ति

भगवान श्रीकृष्ण श्रीमदभागवत गीता में कहते हैं:–

"भक्त्या मामभिजानांति यायान्यश्चरस्मि तत्वतः।

ततो मां तत्वतो ज्ञात्वा विश्ते तदनन्तरम्।।"

अर्थ :– "उस पराभक्ति के द्वारा वह भक्त मुझ परमात्मा को, मैं जितना हूँ और जो हूँ, मुझे, तत्व से जान लेता है; फिर अपनी भक्ति द्वारा मुझे, इस प्रकार, तत्व से जानकर, तत्काल ही मुझमें ही प्रविष्ट हो जाता है।"

अर्थात – मेरे चाहने वाले भक्त, ज्ञान–योग, कर्म–योग, भक्ति–योग और ध्यान–योग द्वारा ही, मुझे प्राप्त हो सकते हैं। अन्य और कोई मार्ग नहीं है। ये सभी मार्ग एक साथ रहते हैं। जहां कर्म होगा, वहीं ज्ञान होगा; जहां ज्ञान होगा, वहीं योग होगा और जहां ज्ञान एवं योग होगा, वहीं भक्ति भी होगी।

ज्ञान का अर्थ जानना और योग का अर्थ, वासना–वृतियों का विरोध करके, प्रभू परमेश्वर से मिलना है। इसलिए ज्ञान द्वारा प्रभू को जानना तथा योग द्वारा मिलना ही पराभक्ति है। अगर ज्ञान और भक्ति द्वारा प्रभू को जानेंगे नहीं और योग साधना द्वारा मिलेंगे नहीं, तो यह भक्ति कैसे हो सकती है। इसलिए प्रभू को जानने व मिलने के लिए भक्ति करनी चाहिये। भक्ति के साथ–साथ, योग साधना भी करनी चाहिये। जब भक्ति द्वारा अपने अन्तर–मन में, कण–कण में, भगवान को बिठा लेंगे, तभी समाधी, भुक्ति, निर्वाण होगा। इस तरह, हम प्रभू को ठीक तरह से जान–पहचान सकेंगे और प्रभू परमेश्वर में लीन हो जायेंगे।

इसलिए, कर्म–योग, ज्ञान–योग, ध्यान–योग, भक्ति–योग जो एक दूसरे के पूरक हैं, के द्वारा ही परम पिता परमेश्वर से मिला जा सकता है। प्रभू से मिलने, समाधि, मोक्ष, निर्वाण के लिए, किसी विशेष पंथ, मज़हब, रिलिजन या सम्प्रदाय में दीक्षा लेने की आवश्यकता नहीं है। न ही मज़हब, सम्प्रदायों के झगड़ों में पड़कर समय गंवाने की आवश्यकता है। अगर आवश्यकता है, तो वह एक उतम एवं पूर्ण गुरु की और आत्मशुद्धि के लिए वासना रहित बनने की।

भगवान श्री कृष्ण श्रीमदभागवत गीता में आगे कहते हैं :–

"अनन्यश्चिंतयंतो मां ये जनाः पर्यपासते।

तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम।।"

अर्थ :– जो भक्तजन मुझ परमेश्वर को निरन्तर चिन्तन करते हुए निष्कामभाव से भजते हैं; उन नित्य निरन्तर मेरा चिन्तन करने वाले पुरुषों का योगक्षेम मैं स्वयं प्राप्त कर लेता हूँ।

मुझसे मिलने का रास्ता भी इतना सहज बना रखा है, कि यदि तुम जान लोगे, तो बिना घर बार छोड़े, संन्यास लिए बिना ही, आनन्द से मुझे मिल

सकोगे। यह रास्ता इतना सहज होने पर भी, जब तक कि तुम, मेरे लिए व्याकुल नहीं होते, तब तक तुम्हें नहीं मिल सकता। मेरा चिन्तन करने वालों की मैं विघ्न–बाधाओं से बचाकर रक्षा करता हूँ। मैं ही सब छोटे–बड़े जीवों का भरण–पोषण करता हूँ। तुम एकाग्र होकर मेरी उपासना करो। योग भी मैं दूगा और रक्षा भी मैं ही करुगा।

सीधे शब्दों में यदि हम में प्रभू प्राप्ति की प्रबल इच्छा है; तो सब से पहले हमें अपने विषय–विकारों, जैसे काम, क्रोध, लोभ, मोह एवं अहंकार से विरक्त या अलग होना है। इन वासना–वृतियों को छोड़कर या संकल्प करके ईश्वर, परमेश्वर की भक्ति करनी चाहिये। इसमें कोई संशय नहीं, कि प्रभू हमारी रक्षा भी करेंगे और योग्य गुरु से साक्षात्कार करा कर योग भी देंगे।

योग शिखोपनिषद् में भगवान ब्रह्माजी, भगवान शिवजी से कहते हैं :–

इस संसार में सब जीव सुख–दुख, जन्म–मृत्यु और माया–जाल के चक्कर में झकड़े हुए पड़े हैं; उनकी मुक्ति के उपाय क्या है; मुक्ति कैसे हो सकती है; कृपया विस्तार से बताईये, कि मनुष्यों को ललसा, हिन्सा, मोह व मायारुपी पाश और जन्म–मृत्यु से बाहर निकालने वाला, व्याधिनाशक, महाआनन्द और महासुख देने वाला सिद्ध मार्ग क्या है।

बातें सुनकर, भगवान शिवजी, भगवान ब्रह्मा जी से कहने लगे, कि यह मार्ग कैवल्यरुप परमपद है। योग के बिना इसे अन्य प्रकार के मार्गो से प्राप्त करना सरल नहीं, बल्कि कठिन है। केवल सिद्ध मार्ग, 'महा–योग', से ही इसे प्राप्त किया जा सकता है। क्योंकि, योग मार्ग के बिना, किसी अन्य मार्ग से मन को वश में करना सहज नही है । मन के वश में होते ही, योग सिद्ध हो जाता है और मुक्ति का मार्ग प्रशस्त होता है।

भगवान शिवजी आगे कहते हैं :– यह योग 'महायोग' के नाम से कहा गया है। देखने में आया है कि साधारणतः लोग हठयोग, मन्त्रयोग, लययोग और राजयोग को भिन्न – भिन्न समझते हैं। परन्तु ये योग, भिन्न – भिन्न नहीं है; यह एक दूसरे के पूरक है। ये चारों योग, कुण्डलिनी शक्ति के जागृत होने पर, स्वयं अपने आप ही होते हैं। इसी लिए इसे 'महायोग' या 'सिद्ध उपाय' कहते हैं। जब किसी कुण्डलिनी शक्ति सम्पन गुरु के अनुग्रह या कृपा से, मनुष्य के संचित पापों के नाश होने पर, मन, में सदिच्छा जाग उठेगी, तब इस ब्रह्मांड में होने वाले आलौकिक और कल्पनातीत विषय को अनुभव कर सकोगे। जब मन की सदिच्छा प्रबलता को प्राप्त होगी, तब मनुष्य के अन्दर छिपी हुई, देवीय शक्तियों का विकास होगा। आंतरिक विकास के होते ही, 'महायोग' का मंत्र, शारीरिक, मानसिक व आत्मिक प्रसन्नता प्रदान करेगा।

याज्ञवल्क्य संहिता में कहा गया है :– "मनुष्य के शरीर के मध्य पेट के पास, नाभिस्थान है और वहीं पर मैं, (जीवात्मा, परमात्मा, आत्मशक्ति) वैश्वानर

रुप से रहता हूँ। कुम्भक प्राणायाम द्वारा, मुझे वहां जलता हुआ देखोगे या पावोगे या मैसूस कर सकोगे। मैं, अग्नि–रुप से, नाभिस्थान में रहकर, प्राण और अपान के सहयोग से, चार प्रकार के अन्न को पचाता हूँ। देह के मध्य में, सदृश त्रिकोन अग्नि का स्थान है। कुम्भक करके मुझे वहां प्रकाशमान पावोगे या देखोगे।

मनुष्य के नाभिस्थान के पास ही मूलाधार है। वहीं से सब नाड़ियों की उत्पति होती है। इस लिए इन नाड़ियों के मूलस्थान को 'मूल – आधार' या 'मूलाधार' कहते हैं। इस मूलाधार से कुछ नाड़ियां ऊपर की ओर उठती है और कुछ नीचे की ओर चली जाती है। शक्ति या कुण्डलिनी शक्ति को जागृत करने के लिए, इसी मूलाधार के पास जाने के लिए, अन्दर का रास्ता बंद है। कुम्भक प्राणायाम करके, प्राण वायु को अधिक बढ़ा लेने से, तथा प्रबल प्राण प्रवाह द्वार मूलाधार का द्वार खुल जाता है। द्वार के खुल जाने से, प्राण के साथ–साथ, मन भी इसमें चला जाता है। कुण्डलिनी शक्ति के जागृत होने पर, पराशक्ति मेरुदण्ड, सुषुम्ना, मूलाधार, स्वाधिष्ठान, मणिपुर, अनाहात, विशुद्ध और आक्ष चक्रों से होती हुई, सहस्त्रार में (मस्तिश्क में) जा पहुंचती है। कुण्डलिनी शक्ति के मस्तिश्क में पहुचने पर साघक पुन : संसार में लोट नही सकता है। सहस्त्रार में, पहुंचते–पहुंचते, मार्ग में अनेक प्रकार के आलौकिक अनुभव होंगे; जिन्हे देखकर या अनुभव कर, साधक आश्चर्यचकित हो जाता है। यहां स्हस्त्रार में स्वयं परमेंश्वर विराजते हैं। इस तरह साधक यहां पर समाधि या महासमाधि का आनन्द उठाकर, परमानन्द से भी एकाकार कर सकता है।

